श्रीः ।

वेदान्तसिद्धान्तः ।

ॐ श्रीगणेशाय नमः ॥ ॐ रामंसर्वगुणातीतंमायागुण समाश्रयम् । नत्वावेदांतासिद्धांतदीपिकेयंप्रतन्यते ॥ १ ॥ आपातकृतन्यासानांविप्राणामल्पमेधसाम् । सुखंब्रह्मपदं गंतुमियमेवभविष्यति ॥ २ ॥ इहयथारज्ज्वज्ञानात्सर्पः प्रकाशते तत्तत्वज्ञानाच्चोपशाम्यत्येवमात्माऽज्ञानादिदं स्वप्न प्रभंजगदधिष्ठाने ब्रह्मण्यवभासते तत्तत्वज्ञानेन निवृत्तिमेती त्यभिप्रेत्यसंसारदावानलविप्लुष्टांतः करणस्यविषयसुखमपि दुःखपक्षेनिक्षिप्य हिरण्यगर्भादिसुखेष्वप्युद्विग्नचित्तस्य सर्वमूलाज्ञाननिवृत्तौयतमानस्यतन्निवृत्तिलक्षणतत्वज्ञानो त्पत्तौ जीवपरमात्मनोरभेदभावनामुपदिशत्याचार्योनिमि त्तमित्यादिना--

निमित्तंमनश्चक्षुरादिप्रवृत्तौनिर
स्ताखिलोपाधिराकाशकल्पः ॥

रविर्लोकचेष्टानिमित्तंयथायःसनि त्योपलब्धिस्वरूपोहमात्मा ॥१॥

नन्वकृतमंगलाचरणकृतोयंग्रंथइतिनाशिष्टोपादेयंभवि ष्यतीतिचेन्न । आत्मस्मरणलक्षणमंगलस्यकृतत्वान्नोक्त दोषोद्भवः । मंगलानांचमंगलमितिव्यासोक्तेः । मनश्च चक्षुश्चमनश्चक्षुषीतेआदिभूतेयस्यसमनश्चक्षुरादिः करणसमू हः । भूतोत्पत्तिक्रमेण मनःश्रोत्रादीतिवक्तव्ये छांदोग्य प्रसिद्धभूतत्रयपक्षप्राधान्यमादायमनश्चक्षुरादीत्युक्तम् । आ दिशब्दः प्रत्येकंसंबंधमेति । तथा च सतिमनआदीनांमनो हंकारबुद्धिचित्तानां चक्षुरादीनांचक्षुःश्रोत्रत्वग्रसनघ्रा णानां बुद्धींद्रियाणां वागादीनां वाक्पाणिपादपायूपस्थानां पंचकर्मेंद्रियाणां स्वस्वविषयादानेविषयाभिमुखप्रवृत्तिस्त त्रनिमित्तं तटस्थभूतोहेतुर्यः सोहमात्मा नतुमृदादिवद्विका रित्वम् । अत्रात्मशब्देन स इति तच्छब्दलक्ष्यःकल्पितप्रपं चाधिष्ठानभूतः सर्वनियंतापरमात्मोच्यते । आत्मावाइ दमेकएवाग्रआसिन्नान्यत्किंचनमिषदित्यादिवेदांतवाक्ये

ब्दात्मशब्दस्यपरमात्मनिप्रसिद्धत्वात् । अहमितिचत्वं पदलक्ष्यार्थः प्रत्यगात्माकूटस्थउच्यते । तयोश्चसामानाधिकरण्येनाभेदोबोध्यते । यदिपुनरहंशब्देनाहंकारविवक्षा तदातुबाधायांसामानाधिकरण्यम् ।कीदृगात्मानित्योपलब्धि स्वरूपः नित्याचासावुपलब्धिश्चेतिनित्योपलब्धिःज्ञानंस्व रूपंयस्यसतथोक्तः।ननुघटोपलब्धिर्जातापटोपलब्धिर्नष्टेति तदुत्पत्तिविनाशयोः प्रत्यक्षसिद्धत्वात्कथमुपलब्धिर्नित्येति चेत्तयोरुत्पत्तिविनाशयोर्घटपटज्ञानसंबंधविषयत्वात् । ननु संबंधंविनाप्रवर्त्तकत्वासंभवात्संबंधेवासंगत्वक्षतिःसधर्मक त्वावाप्तिश्चेत्यतआहानिरस्ताखिलोपाधिरिति।निरस्तानि र्गताअखिलानिःशेषादेहेंद्रियादयस्तद्धर्मलक्षणाश्चोपाधयो वस्तुतोयस्मात्सनिरस्ताखिलोपाधिःअतएवाकाशकल्पआ काशसदृशःआकाशादीषज्जडत्वमात्रांशेनन्यूनःसर्वानुगतो प्यसंगएवेत्यभिप्रायःसर्वानुगतोप्याकाशवद्विशुद्धइत्यर्थः। यथाव्यापकत्वेनसर्वानुगतोप्याकाशोव्याप्यगुणदोषभाग्न भवति निरवयवस्यतस्यव्याप्यसंगासंभवात् तस्यावय

वधर्मत्वात् मूर्तामूर्त्तयोः कात्स्न्यैकदेशाभ्यां तन्निरूपणा नर्हत्वाच्च । एवंदेहेंद्रियोपाधिसंबंधानर्हत्वमात्मन्यवगन्त व्यम्। समवायस्तुकार्यकारणगुणगुणिजातिव्यक्त्यादौ।नतु ब्रह्मणितदस्ति । सकारणजगदधिष्ठानकारणत्वोपचारात् । क्वचिच्छ्रूयमाणमपि ब्रह्मणः कारणत्वमन्यकारणव्युदासा यैकत्वप्रत्ययदार्ढ्यार्थं न कार्यकारणभावप्रतिपादनाय । वास्तवकारणत्वे नेहनानास्ति किंचनेत्यादिश्रुतिबाधप्रसं गात्। माययाकारणत्वेतुपरमार्थतोऽकारणत्वं ब्रह्मणः पर्य वस्यति। तदुक्तम्। इहरज्जुघटादिहिसावयवंसमुपैतियुजा मितरेतरतः । इतिदृष्टमतोन्यददृष्टमपिस्वयमूह्यमिदंत्वप रित्यजता इति। नन्वविग्रहस्यात्मनोमनश्चक्षुरादिप्रवर्त्तकत्वं वागादिव्यापारंविनाकथमित्याशंक्य तद्वाहि तस्यापि स्वरू पसत्तामात्रेणप्रवृत्तिहेतुत्वंरविदृष्टांतेनदर्शयति । रविः[1] सूर्यः श्रुतिस्मृतिपुराणोक्तकर्मानुष्ठानेयालौकिकानांप्रवृत्ति

---

१ यथारविः श्रौतस्मार्त्तकर्मानुष्ठानेलौकिककृषिवाणिज्यादिव्यवहारेचत दुपदेशादिव्यापाररहितोपिसत्तामात्रेण निमित्तंस्वयमेवाहिउदितआदित्येसर्वे, पिलौकिकाव्यवहरंतिनतुसूर्यस्तानुपदिशति एवंकुरुध्वमिति ।

क्रियाकरचरणादीनांव्यापारस्तस्यनिमित्तं यथायेनप्रका रेणतद्दुपदेशव्यापाररहितोपिस्वरूपसत्तामात्रेणैवकारणं भ वतितद्वदहमपिमनश्चक्षुरादिप्रवृत्तिहेतुर्भवामीत्यर्थः ॥ १ ॥

ननुमनश्चक्षुरादीनानस्वप्रवृत्तावन्यापेक्षातानिस्वतएव प्रवृत्तिलक्षणानीत्याशंक्योत्तरमाह--

यमग्न्युष्णवन्नित्यबोधस्वरूपं
मनश्चक्षुरादीन्यबोधात्मकानि ॥
प्रवर्त्ततआश्रित्यनिःकंपमेकं स
नित्योपलब्धिस्वरूपोहमात्मा ॥ २ ॥

यमित्याश्रित्यपदेनसंबध्यते । मनश्चक्षुरादीनिताव त्प्रवर्त्तमानानिजडत्वाद्रथादिवच्चेतनप्रवर्त्तकमंतरेण न प्रव र्तितुमर्हंति । तथा च यमाश्रित्यप्रवर्तंतेचेष्टंतेयत्प्रकाशि तानिस्वस्वविषयादाने क्षमाणि भवंति सोहमित्यन्वयः । वैशेषिकाद्यभिमतं बोधात्मनोर्गुणगुणिभावमपाकर्तुमग्न्यु ष्णत्वदृष्टांतेनपूर्वोक्तंनित्यबोधस्वरूपत्वमेवाह । अग्न्युष्ण वत् इति। अग्नेरुष्णेनतुल्यं भवतिइत्यग्न्युष्णवत् उष्णंयथा

ग्नेर्नातिरिच्यतेअतिरिक्तेघटादिवत्ततोन्यत्राप्युपलभ्येत । य
तस्तद्व्यतिरेकेणनोपलभ्यतेउष्णं ततोग्निस्वरूपमेव तथास्व
रूपावयवधर्मलक्षणविनाशसामग्रीरहितत्वात् । नित्योयोबो
धस्तदेवस्वरूपंयस्यसनित्यबोधस्वरूपस्तम् मनश्चक्षुरादीनि
मनआदीन्यंतःकरणानिचक्षुरादीनिबाह्यानिकरणानि शरी
राणि च तानि चजडान्यबोधात्मकत्वाद्बोधादन्योऽबोधोज
डंतदेवात्मास्वरूपंयेषांतानितथोक्तानितेषां चरथादिव चेत
नप्रवर्तकं विनाप्रवृत्तिर्नसंभवतिनित्यबोधस्वरूपात्मप्रेरिता
निप्रवर्त्तंते । स्वरूपसत्तामात्रेणैवायस्कांततपनयोर्लोहलो
कप्रवृत्तिहेतुत्ववत्प्रवृत्तिहेतुत्वं न तु कायवाग्व्यापारवत्त्वं
विक्रियांविनैवप्रवर्त्तकत्वंदर्शयति। निःकंपंनिर्गतः कंपः क्रि
यायस्मात्सतथोक्तस्तंनिस्त रंगंनिःसंशयमित्यपिकेचित् ।
श्रुतिंचात्रदर्शयति भेदनंहृदयग्रंथेः सर्वसंदेहच्छेदनम्॥ कर्म
णांचक्षयः पुंसः परमात्मनि वीक्षित इति । एवं कीटादि
ब्रह्मांतेष्वनुगत्वमेकोदेवः सर्वभूतेषुगूढइतिश्रुतेः । एक
एवतुभूतात्माभूतेभूतेव्यवस्थितः । इतिश्रुतेश्च । एकमिति

सांख्यवैशेषिकादिमतापकरणमवगंतव्यम् । ननु चेतना धीनाजडप्रवृत्तिरित्युक्तं तथाचात्मनश्चेतनत्वे किं प्रमाणमिति चेत्तच्छृणु । साक्षी चेता केवलोनिर्गुणश्चेत्यागमस्यैवतत्प्रमाणत्वात् । बोधशब्देनापितस्यैवाभिलापात् । ननुतर्हित द्धर्मा पुरुषइतिचेन्न । चैतन्यमात्मनो भिन्नंनवा । आद्येधर्मधर्मिभावोनस्यात् । ऋक्षसिंहयोरिव । नचतयोरसंबंधान्नतथा । चैतन्यस्यत्वात्मसंबंधित्वात् । किंनभवेत्तद्धर्मइतिवाच्यम् । संबंधः संयोगोवासमवायोवा । संयोगस्यद्रव्यधर्मत्वाच्चैतन्यस्य भवन्मतेगुणत्वात् । नापि समवायः तस्यगुणगुणिजातिव्यक्त्यादिधर्मत्वात् । तद्विपरीतेआत्मानितदसंभवात् । तथाहि नात्माद्रव्यम् अस्थूलमनण्वह्रस्वमदीर्घमित्यादिद्रव्यधर्मप्रतिषेधात् । साक्षाच्चनिर्गुणत्वोपदेशात् । नापिगुणस्तस्यनित्यापराश्रयत्वात् । सभगवः कस्मिन्प्रतिष्ठितः स्वमहिम्नीत्यादावात्मनश्चस्वमहिमप्रतिष्ठितत्वश्रवणात् ।

---

१ आत्मचैतन्ययोरद्रव्यत्वान्नतत्संभवः राहोः शिरइतिवदभेदेपिभेदव्यपदेशः ।

नापिजातिः । नित्यमनेकानुगतत्वाभावात्तद्व्यतिरेकेणेत रेषामनित्यत्वात् । नापिव्यक्तिर्जातिप्रत्याख्यानेनैवतत्समा नयोगक्षेमायास्तस्याअपि प्रत्युक्तत्वात् । किंच समवायः समवायिषुसंबद्धोवासमवायिनः संबंधयेदसंबद्धो वा । आ द्ये संयोगेन समवायस्याद्रव्यत्वात् । नापिसमवायेनस्वे नैवचेत्स्वात्माश्रयःसमवायांतरेणचेदन्योन्याश्रयः । अपरे णैव चेच्चक्रकानवस्थादिदोषप्रसंगः । असंबद्ध एवसंबंधांत रेणसमवायः । स्वयंसंबंधस्वरूपत्वात्समवायिनासंबंधय तीति चेत् । हिमवद्विंध्ययोरपिसमवायप्रसंगः संयोगे चा तिप्रसंगः । सोपि हि स्वयंसंबंधरूपएवसन्समवायेनेव संयो गिषुसमवेतीत्यभ्युपगम्यतेभवता । तस्माद्बोधात्मनोः संबंधा संभवाद्बोधएवात्मानबोधधर्मीस्वस्यचस्वधर्मत्वे घटोपि घ टधर्मी स्यात् । उक्तं च निरंशत्वाद्विभुत्वाच्च तथानश्वरभा वतः। ब्रह्मव्योम्नोरभेदोस्तिचैतन्यब्रह्मणोधिकम् ॥ २ ॥

ननुमनश्चक्षुरादिप्रवर्तकस्यात्मनस्तत्संयोगोस्तिनवा।अस्ति चेदद्रव्यत्वासंगत्वनिर्धर्मकत्वादीनां क्षतिःस्यात् ।नचेत्प्रवर्त कतासंभवइतिशंकामपाकरोत्युत्तरश्लोकेनमनश्चक्षुरादेरिति-

मनश्चक्षुरादेर्वियुक्तःस्वयंयोमनश्च क्षुरादेमर्नश्चक्षुरादिः ॥ मनश्चक्षुरा देरगम्यस्वरूपःसनित्योपलब्धिस्व रूपोंहमात्मा ॥ ३ ॥

मनश्चक्षुरादेर्वियुक्तोविगतसंबंधः संयोगसमवाययोः पूर्वमेव निराकृतत्वात् । आध्यासिकसंबंधमंतरेण संबंधांतरस्यसंभवात । ततश्च करणमात्रसंबंधराहितस्तस्य च भासको योयमात्मा सोहमित्यन्वयः । यथाहुः—यदनभ्युदितं वदनेनसदानयनेन नपश्यतियं चसदा । श्रवणेन च यं न शृणोतिसदामनसापिचयेमनुतेनसदा ॥ वदनंनयनं च तथाश्रवणं मनएवच येन ततं सततम् । अवगच्छतदेवपदं परमं त्वमितिश्रुतिरीक्षितुरुक्तवती ॥ तस्मात्संयोगाद्यनंगीकारान्नतुआत्मानि तद्दोषप्रसक्तिः । ननु तत्संबंधाभावात्कथं तत्प्रवर्तकत्वमित्याशंक्योत्तरमाह । मनश्चक्षुरादेर्मनश्चक्षुरादिरिति । मनसोमनोमनस्त्वापादकोमनसोव्यापारहेतुरित्यर्थः । एवंचक्षुषःचक्षुश्चक्षुष्ट्वापादकएवंप्र

त्येकमन्वयोद्रष्टव्यः । श्रुतिरप्यत्र श्रोत्रस्यश्रोत्रंप्राणस्य प्राणोमनसोमनइत्यादिवाजसनेयिनाम् अयमभिप्रायः नश्रोत्रं स्वयमेवशब्दश्रवणसमर्थंकिंतर्हिंचैतन्यज्योतिषादीप्तंतस्माद्य च्छ्रोत्रेणश्रवणसामर्थ्यंतदात्मनिमित्तमित्यात्माश्रोत्रस्यश्रोत्रं श्रोत्रत्वापादक इति । एवमन्यत्राप्यूह्यम् । यथाकुलालह स्ताधिष्ठितो दंडो घटोत्पत्तिहेतुर्भवति तथा चिदधिष्ठितानि करणानिस्वस्वविषयोपलब्धिहेतुतांयांति । अतएवमनश्चक्षु रादिविषयताचितो नास्ति । नहि कल्पिततमोधिष्ठानस्यस वितुस्तद्विषयतातद्व्यतिरेकेण तस्यांतरासंभवात् । मनश्चक्षु रादेरित्यादिना । श्रुतिरप्यमुमर्थमाह-न तत्र चक्षुर्गच्छति नवाक्गच्छतिनमनोनाविद्याइति । नचक्षुषागृह्यतेनापिवा चेत्यादि । ननुऔपनिषदत्वमात्मनोमनआद्यगोचरत्वेव्या हन्येत। मनसैवेदमाप्तव्यंनहद्रामनीषामनसाभिक्लृप्तइतिचो परुध्येत न औपनिषदत्वात्मनिउपनिषज्जन्यज्ञानविष यत्वम् । नतुतज्जन्यातिशयाधारत्वंयेनव्याघातः स्यात् । तदुक्तम्। फलव्याप्यत्वमेवास्यशास्त्रकृद्भिर्निराकृतम् । ब्रह्म

ण्यज्ञाननाशायवृत्तिव्याप्तिरपेक्षितेति । तदेवचवृत्तिव्याप्य
त्वंमनसैवेदमाप्तव्यमित्यर्थः । यद्वातदाकारांतःकरणवृ
त्युत्पादकत्वमेवतद्विषयत्वमुपानिषदः । यद्वामनश्चक्षुरादेर्वि
युक्तोव्यतिरिक्तः । नचात्मापरिच्छिन्नश्चक्षुरादिव्यतिरिक्त
त्वात् घटवत्इतिवाच्यम् । आकाशादौहेतोः साध्यव्यभि
चारस्तस्य नित्यव्यापकत्वेनतदव्यतिरिक्तत्वेपिदेशकालवा
स्तुपरिच्छेदाभावात् । अथवास्वयमेवोत्तरमाह मनश्चक्षुरा
देर्मनश्चक्षुरादिरिति । अयमर्थः यद्यप्यात्मामनश्चक्षुरा
दिव्यतिरिक्तस्तथापितेषांमनश्चक्षुरादीनामात्मन्यध्यस्तत्वे
नरज्जुसर्पवदध्यस्तस्याधिष्ठानादन्यत्वाभावादित्युक्तं पुर
स्तात् । उक्तं ब्रह्मवित्पूज्यचरणेनपराशरेण व्यतिरिक्तंनय
स्यास्तिव्यतिरिक्तोखिलव्ययइति । तेषातत्राध्यस्तत्वाद
धिष्ठानत्वेनतदगम्यस्वरूपोभवतीत्यर्थः। तदुक्तंसंक्षेपशारीर
के-नहिभूमिरूषरवती मृगतृणजलवाहनीरसंवहति । मृग
वारिपूरपरिवारवतीननदीतथोषरभुवंस्पृशतीति ॥ ३ ॥

ननुनित्यबोधस्वरूपपरमात्मस्वरूपतैवत्वंपदार्थस्योक्ता

तथाचबंधमोक्षसुखादिव्यवस्थाअन्यस्यैवभविष्यति । न त्वात्मनस्तस्यसकलधर्मातीतब्रह्मस्वरूपत्वादित्यतआह---

मुखाभासकोदर्पणेदृश्यमानोमुखत्वात्पृथक्त्वेननैवास्तिवस्तु॥चिदाभासकोधीषुजीवोपितद्वत्सनित्योपलब्धिस्वरूपोहमात्मा ॥ ४ ॥

मुखाभासकइति । मुखस्याभासोमुखाभासोमुखाभास एवमुखाभासकइति । स्वार्थे कप्रत्ययः । मुखप्रतिबिंबोदर्पणादिप्रतिबिंबोपाधौदृश्यमानः प्रतीयमानोमुखत्वात् । भावे त्वप्रत्ययः । परमार्थभूतात् मुखात्पृथक्त्वेनभेदेननैवास्ति वस्तुयद्यपिभासतेतथापिवस्तुतो नास्त्येव वस्तुभूत इत्यर्थः । तथापि नानादर्पणजातिषु नानेवप्रतिभासंतेमुखाभासाः । एवंचितश्चैतन्यस्याभासश्चिदाभासः एवंचिदाभासकोधीषु बुद्धिषु जीवः प्राणानांधारयितातद्वदिति पूर्वेणान्वयः । अयमभिप्रायः । यथाबिम्बप्रतिबिंबव्यवहाररहितंमुखंचंद्रादिर्वानानोपाध्यनुगतःपरमार्थस्वरूपवैपरीत्येनभासते तथा

सजातीयविजातीयस्वगतभेदरहितसच्चिदानंदस्वरूपंब्रह्मना
नांतःकरणोपाध्यनुगतंबद्धमुक्तगुरुशिष्यादिव्यवहारंभजते
नतु चिद्धातुबुद्धिगताश्चित्प्रतिबिंबः पृथग्वस्तु । अन्यथा
जातेपि तत्वज्ञानेतत्प्राप्तिर्न स्यात् । अन्यस्यान्यरूपतादर्शनादहिनकुलवत् । एवंभूतोयोयमात्मासोहमित्यन्वयोन्यत्पूर्ववत् । ननु सिद्धपारदयोगादयसः कांचनता दृष्टा क
मन्यस्यान्यरूपता नोपलभ्यत इति चेन्न । त्रोटकाचा
र्येवापकृतं तत्पृथक्खंडनमनुष्ठीयते । तद्यथा-उदकावय
वानभिभूयपयोरजतावयवांश्च यथा कनकम् । विपरीतमातिंज
नयत्युदकेरजते च तथायसि हेममातिम् ॥ रसवीर्यविपाकवि
नाशमनुप्रगमिष्यति कांचनताप्ययसः । कृतकं हि ननित्य
मितिप्रकृतिंसमवेतमवश्यमपैति यतः ॥ तथा च वस्तुतोभि
न्नयोरभेदानुपपत्त्यातदभेदेमोक्षशास्त्रवैयर्थ्यंस्यात् ॥ ४ ॥

ननजीवस्यब्रह्मरूपत्वाद्बंधोऽसंभवोबद्धोहिमुच्यतेनाबद्ध
इति । तदुपाधेस्तत्त्वज्ञानबाध्यत्वात् । कस्य मोक्षस्तस्माद्बं
धमोक्षयोरसंभवान्मोक्षप्रतिपादकंशास्त्रमप्रमाणमेवेतिशंकाम
पाकरोति-

यथादर्प्पणाभावआभासहानौमु
खंविद्यतेकल्पनाहीनमेकम् ॥
तथा धीवियोगेनिराभासकोयः
सनित्योपलब्धिस्वरूपोहमात्मा॥५॥

यथादर्प्पणाभावआभासहानाविति ॥ यथायद्द र्पणे उत्तारिते तदभावे वाआभासहानौसत्यां निमित्ताभावेनैमि त्तिकस्याप्यभाव इतिप्रसिद्धेः । मुखप्रतिबिंबेनिवृत्तेनिरु पाधिकंमुखमात्रं विद्यते कल्पनाहीनं द्वैविध्यभानभ्रमरहितं बिंबप्रतिबिंबव्यवहारहीनं परमार्थमुखमेव विद्यतइत्यर्थः । दृष्टांतं दर्शयित्वा तद्वदुपाध्यभावे दार्ष्टान्तिकेप्येतद्दर्शयति । तथा धीवियोग इति । तथातेनैवप्रकारेणधियोबुद्धेर्वियोगे तत्त्वमस्यादिवाक्योत्थयाखंडाकाराकारिताचित्तवृत्त्या अविद्यातत्कार्यबाधेनिवृत्तेसति योनिराभासकोनिर्गत आभासोयस्मात्सः तथा ।स्वार्थेकप्रत्ययः।निःप्रति।बिंबोजी वब्रह्माविभागरहितः सोहमित्यन्वयः । नित्योपलब्धिस्व रूपइत्यादिपूर्ववत्सर्वत्र।अयमभिप्रायः । आत्माज्ञानोद्भूतो

योबुद्ध्यादिरुपाधिस्तत्रप्रतिबिंबरूपेणात्मानमध्यस्यतद्धर्मं चसुखदुःखादिकमात्मन्यध्यस्यतिसोयमध्यासलक्षणोबंधस्तत्वज्ञानेनसकारणस्यतस्यबाधएवमोक्षइतिसर्वमनवद्यम् ॥ ५ ॥

ननुनिःकंपमेकमित्यादिनासर्वशरीरेष्वेकएवात्मोक्तस्तच्च नसंभवतितथासत्येकस्मिन्सुखिनिसर्व एव सुखिनःस्यु र्दुःखिनि वा दुःखिनोभवेयुर्नत्वेवमस्त्येव बंधमोक्षगुरुशिष्य जन्ममरणादिव्यवस्थान्यथानुपपत्त्याप्रतिशरीरमात्मांतर सिद्धिः । तथाचकणादोदितंसूत्रं "नानात्मानोव्यस्थातः" इतिशंकामपाकर्त्तुंश्लोकमवतारयति । यएकोविभातीति । यद्वाययात्मामनश्चक्षुरादेरगम्यस्वरूपस्तदाकथमस्यसिद्धिः पदार्थमात्रस्यतदधीनसिद्धिकत्वादात्मसिद्धावपितदेवसाधन मुचितमन्यथातद्रहितस्यखपुष्पादिवदत्यंतासत्यत्वमेवस्या दित्यत आह–

यएकोविभातिस्वतःशुद्धचेताःप्रका शस्वरूपोपिनानेवधीषु ॥ शरावो-

दकस्थोयथाभानुरेकःसनित्यो
पलब्धिस्वरूपोहमात्मा ॥ ६ ॥

एक अद्वितीयः सजातीयविजातीयस्वगतभेदरहितः। वृक्षस्यस्वगतोभेदः पत्रपुष्पफलादितः । वृक्षांतरात्सजातीयो विजातीयः शिलादितः । एकोदेवः सर्वभूतेषुगूढः सर्वव्यापी सर्वभूतांतरात्मा । अजोह्येकः। एकोवशीसर्वभूतान्तरात्मा । एकमेवाद्वितीयंब्रह्म।एकंनिविष्टंबहुधागुहासु । क्षेत्रज्ञंचापि मांविद्धिसर्वक्षेत्रेषुभारत । अहमात्मागुडाकेशसर्वभूताशयास्थितः । अविभक्तंचभूतेषुविभक्तमिवचास्थितम् । एकएवतुभूतात्माभूतेभूते व्यवस्थितः । एकधाबहुधाचैव दृश्यतेजलचंद्रवत् । समोमशकेन समोनागेनेत्यादिश्रुतिस्मृतिवाक्यसंचिवेनैवइतिपदेन सांख्यवैशेषिकादिमताभ्युपगतोनानाजीववादो निराकृतइत्यवगंतव्यम् यानिचजन्ममरणसुखदुःखादीन्यात्मभेदसाधकानि लिंगान्युदाहृतानि तैस्तान्येतदुदाहृतवाक्यापहृतविषयत्वात्कालात्ययोपदिष्टानीत्यवंगतव्यम् । तुल्याचसंसर्गतानेकात्मवादे एक

स्मिन्नात्मनि सुखिनिदुःखिनि वा सर्वात्मनां सुखदुःखादि
मत्त्वप्रसक्तिंविभुत्वेनसर्वदेहगतत्वात्सर्वात्मनां विभाति प्रका
शते स्वतःस्वयमेवनतुज्ञानकर्मत्वेन घटादिवत् । तेषांजड
त्वेनप्रमाणांतरापेक्षास्वरूपप्रकाश उचितैव नतु स्वस्फुरण
स्वरूपस्यात्मनः । अदृष्टोद्रष्टानान्योतोस्ति द्रष्टेतिश्रुतेः
शुद्धंनिर्मलरजस्तमःक्रोधादिमलानभिभूतं चेतश्चित्स्वरू
पं यस्यशुद्धचेताः पुरुषस्तस्यस्वतएवसाधनं विनैवात्मा
स्फुरतीत्यर्थः । यद्वाआत्मनोभेदासिद्धौ प्रमाणापेक्षामपाक-
रोति । स्वतइति । प्रमाणापेक्षांविनैवासिद्धमवगतंचेतः चैत
न्यंज्योतिः स्वरूपं यस्यसतथोक्तः । यतोवाचोनिवर्त्तंते अ
प्राप्यमनसासहेति नतत्रचक्षुर्गच्छतिनवाग्गच्छतिइत्यादि
प्रमाणविषयत्वमात्मनउपपादनंपुरस्तात् । अपिशब्दः एक
पदेनसंबध्यते स्वप्रकाशस्वरूप एकोप्यात्माअनेकासुधीषु
बुद्धिषुप्रतिबिंबतामवाप्य तत्तद्गतसुखदुःखाद्यनेकोपाध्य
धिष्ठानत्वेननानेव प्रतिशरीरं भिन्न इवविभातिप्रकाशतप्रती
यते वा यः सोहमित्यन्वयः। दृष्टांतमाह । शरावोदकस्थइ

ति । शरावेषुउदकानिशरावोदकानिशरावशब्देनप्रतिबिं
बोपाधिजलपूर्णपात्रमवगंतव्यंनतुपार्थिवताग्रहम् । तेषुतिष्ठ
तीतिशरावोदकस्थः । यथायद्यप्येकएवभानुरादित्योनाना
बहुरूपोनिश्चलचंचलस्वच्छमलिनादिभेदेन प्रतिभातीतिसं
बंधः । एवमात्माप्येकएवपरमार्थतःसन्मायाकल्पितमौ
ढ्यपांडित्यशौर्यभीरुत्वादिभेदभिन्नासु नानाबुद्धिषुनानेव
भासतइत्यर्थः ॥ ६ ॥

ननुभवत्वात्मनउपाधिरूपादेकस्यैव बहुधाव्यवस्था
कथंनिरीहस्यदेहेन्द्रियादिसंबंधरहितस्य सर्वधर्मातीतस्य
श्रुतिस्मृतिपुराणसिद्धस्येहलोकपरलोकगतिरुपपद्यतइत्याशं
क्य जलचांचल्येन चंद्रचांचल्यवदुपाधिगत्यातत्रगति
भ्रमोनत्वमूर्तस्यगतिः संभवतीतिदृष्टांतपूर्वकमाह—

यथासूर्यएकोप्यनेकश्चलासुस्थि
रास्वप्यबन्वग्विभाव्यस्वरूपः ॥
चलासुप्रभिन्नासुधीष्वेकएवसानि
त्योपलब्धिस्वरूपोहमात्मा ॥ ७ ॥

यथासूर्यएकइति । यथायेनप्रकारेणशरावादिगतासुचं चलासु स्वच्छत्वमलिनत्वाद्युपाधिविशिष्टास्वप्सु जलेषुप्र तिबिंबितः सूर्यएकोनेकोनानारूपतयाप्रतिभासतेनत्वाका शेदेदीप्यमानस्य रवेर्भ्रममंतरेण बहुत्वस्वच्छत्वमलिनत्वा दिकंकालत्रयेऽप्यस्ति । चलासुचंचलासुस्थिरासुस्थितासु तिष्ठंतीषु अपिशब्दः स्वच्छमलिनबहुस्वल्पादिसमुच्चया र्थः । अबन्वग्विभाव्यस्वरूपः अपामनुगच्छतीत्यबन्वक् अपांगमनं स्वच्छत्वमलिनत्वाद्युपाधिवैशिष्ट्यमधिगच्छती त्यर्थः । तत्रतद्वद्विभाव्यंजलचलनाद्यनुकारेणानुक्तंस्वरू पंयस्यसतथा । अन्येत्वनन्वग्विभाव्यस्वरूपइतिपाठमं गीकुर्वते । व्याख्यातंचतैरेव अन्वंचतिगच्छतीत्यन्वक् ना न्वगिति । अनन्वक्तेनाविभाव्यंस्वरूपंयस्यसतथोक्तः । एवंबहुव्रीहिसमासंकृत्वापश्चान्नञासमासः कर्त्तव्यः अय मर्थः रविर्जलानुगतोनभवत्यपितुतथैवाकाशेदेदीप्यमानो भ्रान्त्याजलानुगतःप्रतीयते । दृष्टांतंदर्शयित्वादार्ष्टांति कमाह चलासुकर्म्मानुसारेणेहलोकपरलोकगमनशीलासु

भिन्नासुप्तिशरीरं तिष्ठंतीषुधीषुतदन्वग्विभाव्यस्वरूपस्तद्ध
त्यादिधर्मेणधर्मवानिवभ्रांत्याप्रतीयमानोनतुस्वतः क्रियात
स्यामूर्त्तस्यतदसंभवात् । ध्यायतीवलेलायतीवेतिश्रुतेः ।
सइत्यादिपूर्ववत् ॥ ७ ॥

तस्मात् गुरुशिष्यबंधमोक्षस्वर्गनरकादिव्यवस्थोपाधि
गतात्मनि चंद्रादिचांचल्यवत् भ्रांत्याप्रतीयते नत्वक्रिय
स्यनिरस्तधर्माधर्मसंबंधस्य कापिचेष्टासंभवतीत्युक्तंतन्न सुं
दरं बुद्ध्यादिवदात्मनः क्रमद्रष्टृत्वेनतद्वदेवपरिणामित्वमना
त्मत्वं परिच्छिन्नताचकिंनस्यादित्याशंक्ययादिक्रमद्दष्टत्वं
स्यात्तदैवंस्यान्नत्वेवमस्त्यन्यथाघटदर्शनोत्तरकालएव संदे
होविपर्ययोवास्यान्नत्वेवमस्तितस्माद्बुद्धिस्तद्वृत्तयः सत्यः
कदाचिदविदितानातिष्ठंतीतिदृष्टांतपूर्वकमाह–

यथानेकचक्षुःप्रकाशोरविर्नक्रमेण
प्रकाशीकरोतिप्रकाश्यम् ॥ अने
काधियोयस्तथैकःप्रबोधःसनित्यो
पलब्धिस्वरूपोहमात्मा ॥ ८ ॥

यथानेकचक्षुःप्रकाशोरविरिति । यथायेनप्रकारेण रविरादित्योनेकचक्षुःप्रकाशः अनेकानियानिचक्षूंषितेषां प्रकाशो यस्यसोनेकचक्षुःप्रकाशो युगपदनेकानि चक्षूंष्यधि तिष्ठतीत्यर्थः । ननुक्रमेणैकैकस्यचक्षुषःप्रकाशीकरोति तदधिष्ठातृत्वेनतदनुगतत्वात् । अनेकचक्षुषांप्रकाशोने कचक्षुःप्रकाशः । अत्रबहुवचनस्यत्रित्वमात्रपर्यवसानं न कल्पनीयंसर्वान्कापिंजलानालभेतइत्यादिवत्तत्राशक्यत्वात् तथाकल्पना । अत्रतुतस्यैवसर्वाधिष्ठातृत्वात्सर्वप्रका शकत्वंनतुबुद्ध्यादिवत्क्रमेणप्रकाशीकरोतिप्रकाश्यं अप्र काशान्प्रकाशान्करोतीति प्रकाशीकरोतीतिच्विप्रत्य यः । अभूततद्भावेकृभ्वस्तियोगेसंपद्यकर्त्तरिच्विः । अप्रका शात्मकंजडंवस्तुजातमुदयमात्रेणप्रकाशयतीत्यर्थः । तथा तेनैवप्रकारेणैकश्चासौप्रबोधोऽधिष्ठाता अनेकाधिय इतिद्वि तीयाबहुवचनम् । अनेकान्यंतःकरणानितद्वृत्तीश्चयोयुगप त्प्रकाशीकरोतिसोहमात्मेतिसंबंधः । नतुक्रमेणतानित द्वृत्तीर्वातत्प्रकाशयति । ननुबुद्धिसाक्षीबुद्धिव्यतिरिक्तोना

स्तिसैवग्राह्यग्राहकतयेतिशाक्यभिक्षुपक्षीयाः प्रत्यवति ष्ठंतेतेचापाकृताग्नोटकाचार्यैः । तथा विदितत्वमवि प्रतिपन्नतयामतिषुप्रगतंविषयेषुयथा । यतएवमतःपरसं विदिताविदितत्वतएवयथाविषयाः । ननुभवंतुमतयः प रसंवेद्याःस्वसंवेद्यतायां तुनकंचनदोषंपश्यामइत्यतआह । परसंविदिताः सततंहियतोनविदुः स्वममीविषयास्तुत तः । मतयोपितथापरसंविदितानविदुः स्वममूर्विषयास्तु यथेति ॥ सइत्यादिपूर्ववत् ॥ ८ ॥

ननु सर्वप्रवर्त्तकत्वेन बुद्धितद्वृत्तीनामपरिविरेवास्तुप्रवर्त कः किमात्माभ्युपगमेन । तथाचश्रुतिः—योदेवःसवितास्म कंबुद्धिवृत्तिप्रवर्त्तकः इतिगायत्रीव्याख्यानेयोगियाज्ञव ल्क्योप्युक्तवान् । चिंतयामो वयं भर्गंधियोयोनःप्रचोदया त् । धर्मार्थकाममोक्षेषुबुद्धिवृत्तीः पुनःपुनरित्याशंक्यतत्रा- पिसवितृपदस्यसूते जगदिति योगाश्रयणेनब्रह्मपरतैवेत्याह । विवस्वत्प्रभातमिति । यद्वानित्यबोधस्वरूपआत्माअक्रमप्र- काश इत्युक्तं तदसत्तत्साधकप्रमाणाभावेनाजडप्रकाशरूप- स्यकस्याचिदसंभवात्संभवे वा प्रमाणविषयत्वेनघटादिवज्ज-

इत्वादयोदोषाःस्युरित्याशंक्यदृष्टांतपूर्वकमुत्तरमाह--

विवस्वत्प्रभातं यथा रूपमक्षं प्रगृ-
ह्णातिनाभातमेवं विवस्वान् ॥ य-
दाभातमाभासयत्येकमेकं सनि
त्योपलब्धिस्वरूपोहमात्मा ॥९॥

विवस्वतादित्येनप्रभातं प्रकर्षेण भातंप्रकाशितं तत्प्र-
भयाव्याप्तं रूपादिवस्तुजातं यथायेनप्रकारेणाक्षंचक्षुः प्र-
गृह्णाति प्रकर्षेणनीलपीतादिगुणवैशिष्टयेनबोधयतीत्यर्थः ।
नाभातंनतदप्रकाशितम् । दृष्टांतमुक्त्वादार्ष्टांतिकमाह । एवम
मुनाप्रकारेण विवस्वान् सूर्यो यदाभातंयेनचिद्रूपेणप्रकाशि
तं भासयति एकंप्रधानं समस्तस्यजगतोक्षंचक्षुरेकमक्षंभग-
वदक्षत्वेन प्रधानतोचितैव । अयमभिप्रायः नयनाधिष्ठातृत्वे-
नादित्यानुग्रहोपेतंचक्षूरूपादिगृह्णाति तथा भगवत्तेजसोधि-
ष्ठानभूतो विवस्वानपि तत्प्रसादोपेतएवजगत्प्रकाशयतिसर्व-
जगच्चक्षुःस्थानीयस्यरवेर्भगवदनुग्रहमंतरेणप्रकाशकत्वं ना-
स्ति । किंपुनरन्येषामितिदर्शयितुंतदुक्तम् । ननु विवस्वदा-

दिप्रकाशमपि यथान्येनानुगृहीतं प्रकाशयति। तद्वदात्मापि केनचित्प्रकाशांतरेणानुगृहीतमेव प्रकाशयति इतिचेन्न तस्यापि स्वप्रकाशेन्यापेक्षायामनवस्थास्यात्तदतिरिक्तस्य प्रकाशस्याभावात्तस्यापि जडत्वे जगद्द्धाध्यं स्यात्। नान्योतोस्ति द्रष्टेत्यादिवेदांतकदंबेन द्रष्ट्रंतरस्यप्रतिषेधाच्च। यदादित्यगतंतेजो जगत्भासयतेखिलम्। यच्चंद्रमसि यच्चाग्नौ तत्तेजोविद्धिमामकमिति ज्योतिषामपितज्ज्योतिस्तमसः परमुच्यते इतिस्मृतेश्च प्रतिषिद्धप्रकाशान्तरालाघवादात्मैवानन्यप्रकाशोभ्युपगंतव्यः। तथाच सूर्यादिगतप्रकाशमात्रस्य तत्प्रकाशत्वान्नतत्परप्रकाश्यतेति। स इत्यादिपूर्ववत्॥ ९॥

ननु स्वप्रकाशस्वरूप आत्मासर्वजगत्प्रकाशक इत्युक्तंतच्च न संभवति। सर्वसंबंधे संगत्वक्षतिरतिरिक्तसंबंधे च परिच्छिन्नता स्यात् घटादिवदित्याशंक्योत्तरमाह–

समस्तेषु वस्तुष्वनुस्यूतमेकं सम
स्तानि वस्तूनियन्न स्पृशंति॥ विय
द्वत्सदा शुद्धमच्छस्वरूपं स नि
त्योपलब्धिस्वरूपोहमात्मा॥ १०॥

समस्तेष्विति। समस्तेषु प्रत्यक्षादिप्रमाणगोचरेषु मूर्तामूर्त वस्तुजातेष्वनुस्यूतमनुगतं सच्चिद्रूपाभ्यां सन्घटः सत् जलं सतीव्यक्तिरित्यादिजडपदार्थेषु सत्तान्वयप्रतीतेः। घोरमूढ धीवृत्योर्द्वयोरप्यात्मनोन्वयाभ्युपगमात्। घटसत्वं पटसत्व मित्यादौ विशेषणीभूतानां घटादीनामेव भेदः प्रतीयतेनतुवि शेष्यांशेनप्रत्ययो भवति। यदि तु विशेषणभेदप्रत्ययस्यान्यथानु पपत्याविशेष्यभेदोभ्युपगंतव्यस्तदा घटाकाशमठाकाशादा वपि विशेष्यभेदः प्रमाणसिद्धः स्यात्। तथाच सामान्याभ्यु पगमोऽपसिद्धांतः स्यात् इति नकिंचिदेतत। ननु सर्वानुगतं महासामान्यमेकमात्मा तुनतथा तदसत्। सदेवसोम्येदमग्र आसीदितिश्रुतेः। असन्नेव सभवति। असत्ब्रह्मेति चद्वेदअ स्ति ब्रह्मेतिचेद्वेदसंतमेनं ततोविदुरित्याद्याब्रह्मस्वरूमेव स त्त्वं प्रतिपादयंति ब्रह्मात्माव्यतिरिक्तसत्तानभ्युपगमात्। वि शेषणभेदेपिविशेष्याभेदमपाकरोति। एकंभेदविशिष्टेष्वनुस्यू तमपिनिर्भेदं समस्तानिवस्तूनियदात्मस्वरूपं शुक्तिरजतवन्न स्पृशंति। नतत्रस्वसंबंधमापादयंति। कल्पितस्यस्वरूपासत्त्वे

नाधिष्ठानसंबंधाभावात् । निरवयवशुद्धस्य व्याप्यगुणदोषा लेपेदृष्टांतमाह ।वियदाकाशे यथा सर्वगतमपि शुद्धमेकं तथा सर्वांतर्यामित्वेन सर्वानुस्यूतमपि शुद्धं निर्मलं बुद्धयादिगत रागादिमलरहितम् । प्रज्ञानमेवेति श्रुतेः। अतएवाच्छस्वरू पमच्छं स्वच्छं सर्गादिसर्वधर्मातीतं यद्वस्तु सोऽहमात्मेत्यन्व यः।असंगो नहि सज्जते।असंगोह्ययं पुरुष इतिश्रुतेः १०॥

नन्वसंगश्चेदात्मा कथमहंसुखी दुःखी संसारी बद्ध इत्या दिधर्म्मवत्तया प्रतीयते इत्याशंक्याह––

घनच्छन्नदृष्टिर्घनच्छन्नमर्कं यथा
मन्यतेनिःप्रभं चातिमूढः ॥ तथा
बद्धवद्भाति यो मूढदृष्टेः स नित्यो
पलब्धिस्वरूपोहमात्मा ॥ ११ ॥

घनच्छन्नदृष्टिरिति । घनेन मेघेन छन्ना आच्छादिता दृष्टि र्दर्शनं चक्षुर्यस्य स घनच्छन्नदृष्टिःपुरुषः घनाभिभूतदृष्टिरित्य र्थः।स घनच्छन्नं घनेनाभिभूतं यथायेनप्रकारेणार्कमादित्यंम न्यते जानाति कथंभूतमर्कं निःप्रभं निर्गताप्रभा दीप्तिर्यस्मात्स

तथोक्तस्तम् । नन्वल्पपरिमाणेनकथंमहत्परिमाणस्यरवेश्छन्न त्वं मन्यते इत्याशंक्याह । अतिमूढः अतिशयेन विवेकरहित इत्यर्थः । दृष्टांतमुक्त्वा दार्ष्टांतिकमाह तथा आदित्यविपरीतभानप्रकारेण बद्धः संसारी सुखदुःखीतितेनतुल्येवर्ततइति बद्धवत् । ननु वस्तुतोमूर्त्तस्याद्वितीयस्याविद्यादिसंबंधाधिष्ठानस्य बंधमोक्षौ संभवतस्तयोरवस्तुभूतत्वात् । तदुक्तं श्रुतौन निरोधो न चोत्पत्तिर्न बद्धो नच साधकः। नमुमुक्षुर्न वै मुक्त इत्येषा परमार्थतेतिश्रुतेः । वस्तुगत्या एवंभूतोपि मूढः आत्मानात्मविवेकरहितादृष्टिर्बुद्धिर्यस्य स मूढदृष्टिः पुरुषस्तस्य वेदांतश्रवणसंस्काररहितांतःकरणस्य एवंभाति सोहमित्यन्वयः ॥ ११ ॥

तथाच जन्ममरणसुखदुःखस्वर्गनरकबंधमोक्षादिव्यवस्थोपाधिगतैवात्मनि सर्वधर्मातीते केवले निरस्ताविद्यात त्कार्यसंबंधेभ्रमात्प्रतीयते इतिदृष्टांतपूर्वकमाह–

उपाधौ यथा भेदतासन्मणीनां
तथा भेदता बुद्धिभेदेषु तेपि ॥ यथा

चंद्रिकाणां जले चंचलत्वं तथा।
चंचलत्वं तवापीह विष्णो ॥ १२ ॥

उपाधाविति ॥ उप समीपे आधीयते स्थाप्यते यःस उपाधिर्जपाकुसुमादिःनिर्गुणस्य निर्भेदस्य निष्क्रियस्य च सगुणसक्रियसभेदेन यद्भानकारणं तदुपाधिः । तदेव दृष्टांतपूर्वकमाह । सन्मणीनामिति विशुद्धमणीना यथा येनप्रकारेण जपाकुसुमादींद्रनीलमण्यादिसंबंधात्तमुपरागमवाप्य शुद्धस्फटिकादीनामपि तत्तदाकारेण भानं भवति । दार्ष्टांतिकमाह । तथा तेन मण्यादिप्रकारेण बुद्धीनां भेदाः बुद्धिभेदास्तेषु बुद्ध्याद्युपाधिषु सत्सु तेपि तवापि भेदता नानारूपता कूटस्थत्वादिरूपेण भवति । तद्यथाअधिष्ठानतयादेहद्वयावच्छिन्नचेतनः कूटवन्निर्विकारेण स्थितः कूटस्थ उच्यते । अज्ञानोपहितं बिंबचैतन्यमीश्वरः अंतःकरणतत्संस्कारावच्छिन्नअज्ञाने प्रतिबिंबितं चैतन्यं जीव इतिकेचित् । इंद्रियैरस्मिन्घटसंनिकर्षे अंतःकरणमपि अस्मिद्वा-

रा घटाकारतामेति तच्च सावयवत्वात्परिणम्यमानं देहाभ्यंत
रघटादौ देहघटयोर्मध्ये च सम्यग्व्याप्य वर्त्तते तत्रच देहम
ध्यवर्त्ती तद्भागोहंकाराख्यः कर्तृशब्दवाच्यो भवति । देह
विषयमध्यवर्त्तीदंडायमानस्तद्भागो वृत्तिज्ञानाख्यः क्रिया
शब्दाभिधेयो भवति । घटादिविषयव्याप्तः तद्भागो विषयस्य
ज्ञानकर्मत्वापादकोभिव्यक्तियोग्यमित्युच्यते । त्रिभाग
स्यांतःकरणस्यातिस्वच्छत्वाच्चैतन्यं तत्राभिव्यक्तिमेति ।
तत्राभिव्यक्तस्य चैतन्यस्यैकत्वेप्यभिव्यंजकांतःकरणभाग
लक्षणोपाधित्रैविध्यात्तस्यापि त्रैविध्यं व्यपादिश्यते। कर्तृभा
गानुगतश्चिदात्मा प्रमाताक्रियाभागानुगतश्चिदंशः प्रमाणंविष
यानुगताभिव्यक्तियोग्यत्वभावावच्छिन्नश्चिदंशः प्रमितिरिति
विषयगतं ब्रह्मचैतन्यमज्ञातं सत्तदेव फलमित्युच्यते
बिंबप्रतिबिंबमुखानुगतमुखस्वरूपवत् । जीवेश्वरानुगतं
सर्वानुसंधातृचैतन्यं साक्षीत्युच्यते । ईश्वरोपि त्रिविधः स्वो
पाधिभूताविद्यागुणत्रयभेदात्सोपि ब्रह्मविष्णुरुद्रभेदात् त्रि
विधो भवति । कारणीभूतसत्वगुणविशिष्टो विष्णुः पालकः

कारणीभूतरजोगुणविशिष्टो ब्रह्मा स्रष्टा हिरण्यगर्भस्तु न ब्र
ह्ममहाभूतकारणत्वात् । स्थुलभूतकारणत्वेनौपचारि
कीब्रह्मेति संज्ञा । कारणीभूततमोगुणाविशिष्टत्वाद्रुद्रः संह
र्ता । ब्रह्मोपाधिस्तु सूत्रकारेणैवोपदिष्टः । जन्माद्यस्य यत
इति। अस्य प्रत्यक्षादिप्रमाणगोचरस्य जगतो यतो निमित्ता
ज्जन्मादिजन्मस्थितिभंगं तद्ब्रह्म । ब्रह्मसंज्ञाप्यौपाधिक्येवा त
स्य संज्ञासंज्ञिसंबंधरहितत्वात् । तथा जीवोपि त्रिविधः ।
उपाधिभेदेन विश्वतैजसप्राज्ञसंज्ञाभेदमधिगच्छति । तद्य
था अविद्यांतःकरणस्थूलशरीराविशिष्टो जाग्रदवस्थाभि
मानी विश्वः । विभ्रवण्वस्थूलशरीराभिमानरहित उपाधि
यावच्छिन्नःस्वप्नाभिमानी तैजसः शरीरांतःकरणोपाधिद्वय
हीनांतःकरणसंस्कारावच्छिन्नाज्ञानमात्रविशिष्टः सुषुप्त्यव
स्थाभिमानी प्राज्ञः।एवं स्तंबादिब्रह्मांतास्यंबकचतुर्मुखाद्याः
संज्ञास्तथा सरस्वतीश्रीभवानीत्याद्याश्चैतस्यैवोपाधिभेदेन
संज्ञा अवगंतव्याः । सर्वं खल्विदं ब्रह्मेति श्रुतेः । ननु सर्वा
त्मकत्वेन सर्वत्र सर्वदा चेतसत्त्वमात्मनःकथमिह लोकपरलो

कादौ कर्मनिबंधना तत्क्रियापुराणादौ प्रसिद्धा तस्यामूर्तध
र्मत्वादित्याशंक्याह।यथा चंद्रिकाणामिति । चंद्रिकाश्चंद्रप्र
तिबिंबालक्षणयोच्यंते।चंद्रका इति पाठेपि चंद्रप्रतिबिंबा ए
वावगंतव्याःस्वार्थे कप्रत्ययः।यथा आकाशे देदीप्यमानस्य
चंद्रमसः चंचलत्वं स्वच्छत्वं मलिनत्वं तत्रनसंभवति केवलं
भ्रांत्यातद्धर्मत्वेन प्रतीयतेप्रतिबिंबद्वारा तथा हे विष्णो हेव्या
पनशील इहपुराणाद्युपवर्णितकर्मकार्यसंसारमंडल आध्या
सिकसंबंधबुद्धिगतचंचलत्वमूढास्तदधिष्ठाने ब्रह्मणाधिग
च्छंति।नतु निरस्तधर्माधर्मसंबंधेत्वयि कापि क्रिया संभवति।
ध्यायतीवलेलायतीवेतिश्रुतेः। नचान्यथा ख्यात्याभ्युपगमो
वृत्त इतिवाच्यमत्र सर्वधर्मविशिष्टस्याज्ञानबुद्ध्यादेरारोपा
भ्युपगमाद्धर्मिणोन्यत्र सत्त्वानभ्युपगमात्तच्छंकायानावका
शलेशोपीति सर्वमनवद्यम् ॥ १२ ॥

इति श्रीवेदांतसिद्धांतदीपिकाहस्तामलकटीका समाप्त॥